यस्य या मृततिथिस्तस्य प्रेतपक्षे तत्सजातीयतिथिः पौर्णमासीमृतस्य तु प्रौष्ठपद्येव पार्वणश्राद्धकालः इति हेमाद्रिप्रभृतिव्यवस्थेति पाश्चात्त्यदाक्षिणात्यानां तथाचारः। प्रा०वि० तन्मूलवचनानाममूलकत्वमुक्तमतो वङ्गानां न तथाचार इति बोध्यम्। अधिकमपरपक्षशब्दे २२१ पृ० दृश्यम्। [वाद्यभेदे त्रिका०।

**प्रेतपटह** प्रेतस्य प्रेतत्वसूचकः पटहः। मरणकालवादनीये

**प्रेतपति** पु० ६त०। यमराजे

**प्रेतपर्वत** पु० प्रेतोद्धारणार्थः पर्वतः। गयातीर्थस्थे स्वनामख्याते पर्वते वायुपु० गयाप्र०।

**प्रेतपिण्ड** पु० प्रेताय देयः पिण्डः। पूरकपिण्डे तस्य प्रेतस्य पिण्डरूपदेहविशेषपूरकत्वात् पूरकसंज्ञा यथोक्तं ब्रह्मपु० "शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा। द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च। जानुजङ्घे तथा पादौ पञ्चमेन तु सर्वदा। सर्वमर्माणि षष्ठेन सप्तमेन तु नाड्यः। दन्तलोमाद्यष्टमेन वीर्य्यं च नवमेन तु। दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्य्ययः"।

**प्रेतपुर** न० ६त०। यमालये "शून्यं प्रेतपुरं भवेत्" ब्रह्मपु०

**प्रेतमेध** पु० ६त०। पित्र्युद्देश्यके श्राद्धरूपे यज्ञे।

**प्रेतराक्षसी** स्त्री प्रेतस्य भूतभेदस्य राक्षसीव दूरतोऽपसर्पणकारित्वात्। तुलस्यां रत्नमाला।

**प्रेतराज** पु० ६त० टच्समा०। यमे तस्य मृतस्य शुभाशुभफलविभजनेन शासनात् तथात्वम्।

**प्रेतलोक** पु० ६त०। यमलोके "प्रेतलोकं परित्यज्य आगता ये महालये" उल्कादानमन्त्रः।

**प्रेतवन** न० प्रेतानां मृतानां वनमिवाधारत्वात्। श्मशाने हेमच०। प्रेतकाननादयोऽप्यत्र।

**प्रेतवाहित** त्रि० ३त०। भूताविष्टे त्रिका०।

**प्रेतशिला** स्त्री गयातीर्थस्थे प्रेतोद्धारणार्थे गुध्रकूटपर्वतादिस्थे शिलाभेदे वायुपु० गयाप्र०। गरुडपु० ८५ अ० तन्माहात्म्यादि यथा "येयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता। प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि। धर्मेण धारिता भूत्यै सर्वदेवमयी शिला। प्रेतत्वं ये गता नॄणां पित्राद्या बान्धवादयः। तेषामुद्धरणार्थाय यतः प्रेतशिला ततः। अतोऽत्र मुनयो भूपा राजपत्न्यादयः सदा। तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः। गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः। मुण्डपृष्ठो गिरिस्तस्मात् सर्वदेवमयो ह्ययम्। मुण्डपृष्ठस्य पादेषु यतो ब्रह्मसरोमुखाः। अरविन्दवनन्तेषु तेन चैवोपलक्षितः। अरविन्दगिरिर्नाम क्रौञ्चपादाङ्कितो यतः। तस्माद्गिरिः क्रौञ्चपादः पितॄणां ब्रह्मलोकदः। गदाधरादयो देवा आद्या आदौ व्यवस्थिताः। शिलारूपेण च व्यक्तास्तस्माद्देवमयी शिला। गयाशिरश्छादयित्वा गुरुत्वादास्थिता शिला। स्नात्वा प्रेतशिलादौ तु वरुणामृतेन च। पिण्डं दद्यादिमैर्मन्त्रैराबाह्य च पितॄन् परान्"।

**प्रेतशुद्धि** स्त्री प्रेते सति कालविशेषे शुद्धिः। विप्रादीनां मृतानां मरणनिमित्ताशौचापगमे शुद्धौ "प्रेतशुद्धिं प्रवक्ष्यामि" मनुनोपक्रम्याशौचरूपतद्विरोधिनो दर्शनेन तदपगमे शुद्धिः प्रतिपादिता।

**प्रेतशौच** न० प्रेते सति शौचम् ६त०। प्रेते सति तन्निमित्ताशौचापगमे १शौचे २प्रेतसंस्कारभेदे च तत्प्रकारः गरुडपु० १०६ अ० उक्तो यथा
"प्रेतशौचं प्रवक्ष्यामि तच्छृणुध्वं यतव्रताः!। ऊनद्विवर्षं निखनेन्न कुर्यादुदकं ततः। आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्मृतः। यमसूक्तं तथा जप्यं जपद्भिर्लौकिकाग्निना। स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत्। सप्तमाद्दशमाद्वापि ज्ञातयो ह्युपयन्त्वपः। अप नः शोशुचदघमनेन पितृदिङ्मुखाः। एवं मातामहाचार्य्यप्रेतानाञ्चोदकक्रियाः। कामोदकाः सखिपुत्रस्वस्त्रीयश्वशुरर्त्विजः। नामगोत्रेण ह्युदकं सकृत् सिञ्चन्ति वाग्यताः। पाषण्डपतितस्तेना न कुर्युरुदकक्रियाम्। न ब्रह्मचारिणो व्रात्या योषितः कामगास्तथा। सुरापास्त्वात्मघातिनो नाशौचोदकभाजनाः। अतो न रोदितव्यं हि त्वनित्या जीवसंस्थितिः। क्रिया कार्य्या यथाशक्ति ततो गच्छेद् गृहान् प्रति। विदश्य निम्बपत्राणि नियता द्वारि वेश्मनः। आचम्याथाग्निमुदकं गोमयं गौरसर्षपान्। प्रविशेयुः समालभ्य कृत्वाश्मनि पदं शनैः। प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि। इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात्। क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक् पृथक्। पिण्डयज्ञावृता देयं प्रेतायान्नं दिनत्रयम्। जलमेकाहमाकाशे स्थाप्यं क्षीरञ्च मृण्मये। वैतानोपासनाः कार्य्याः क्रियाश्च श्रुतिचोदिताः"।